# श्री गणपती अथर्वशीर्ष

ध्यानमंत्र : वक्रतुंड महाकाय सूर्यकोटि समप्रभ: ।
निर्विघ्नं कुरू मे देव सर्वकार्येषु सर्वदा ॥
शांती मंत्र :
ॐ भद्रं कर्णेभि: श्रृणुयाम देवा: भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरै: अंगै: तुष्टुवांस: तनूभि: व्यशेम देवहितं यदायु: ॥
ॐ स्वस्तिन इन्द्रो वृद्धश्रवा:, स्वस्तिन: पूषा: विश्ववेदा: ।
स्वस्तिनस्तार्क्ष्यो: अरिष्टनेमि: स्वस्तिनो बृहस्पतिर्दधातु ॥
ॐ शान्ति: शान्ति: शान्ति : ॥

मूल मंत्र :
ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि ।
त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ।
त्वमेव केवलं हर्तासि । त्वमेव सर्वंखल्विदं ब्रह्मासि ।
त्वं साक्षादात्मासिनित्यं ॥**1**॥

ऋतंवच्मि । सत्यंवच्मि ॥**2**॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् ।
अव दातारम् ।अव धातारम् ।
अवानूचा नमवशिष्यम् । अव पश्चात्तात् ।
अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् ।
अव चोर्ध्वात्तात् । अवाधरात्तात् ।
सर्वतोमां पाहि पाहि समंतात्॥**3**॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानंदमयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानंदा द्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥**4**॥

सर्व जगदिदं त्वत्तोजायते । सर्वंजगदिदं त्वत्तस्तिष्ठति ।
सर्वंजगदिदं त्वयिलयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमिरापो ऽ नलो ऽ निलोनभः । त्वं चत्वारि वाक्पदानि ॥**5**॥

त्वं गुणत्रयातीतः । त्वं देहत्रयातीतः ।
त्वं कालत्रयातीतः । त्वं मूलाधारस्थितो ऽ सि नित्यं ।
त्वं शक्तित्रयात्मकः । त्वां योगिनोध्यायन्तिनित्यम् ।
त्वंब्रह्मा त्वंविष्णु स्त्वंरुद्र स्त्वमिंद्र
स्तवमग्नि स्तंववायुस्त्वंसूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भुव: स्वरोम् ॥**6**॥

गणादिं पूर्वमुच्चार्य वर्णादिं तदनंतरम् । अनुस्वार: परतरः ।
अर्धेन्दुलसितं । तारेणं ऋद्धं । एतत्तव मनुस्वरुपम् ।
गकारः पूर्वरूपम् । अकारो मध्यमरूपम् ।
अनुस्वारश्चांत्यरूपम् । बिंदुरुत्तरूपम् ।
नादः संधानम् । संहिता संधिः । सैषा गणेशविद्या।
गणक: ऋषिः । निचृद गायत्रीच्छंद: ।
गणपतिर्देवता । ॐ गं गणपतये नमः ॥**7**॥

ॐ एकदंताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दंतिः प्रचोदयात्॥**8**॥

एकदंतं चतुर्हस्तं पाशमंकुश धारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम ।

रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्त गंधानुलिप्तांगं रक्तपुष्पैः सुपूजितम् ।
भक्तानुकंपिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्टयादौ प्रकृतैः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥**9**॥

नमो व्रातपतये। नमो गणपतये।
नमः प्रमथपतये। नमस्ते अस्तु लंबोदराय
एकदंताय विघ्ननाशिने शिवसुताय
श्री वरदमूर्तये नमो नमः॥**10**॥

फलश्रुती :
एतदथर्वशीर्षयोऽधीते। स ब्रह्मभूयायकल्पते।
स सर्वत: सुखमेधते। स सर्वविघ्नैर्नबाध्यते।
स पंचमहापापात्प्रमुच्यते। सायमधीयानो
दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति।
सायंप्रातः प्रयुंजानो अपापो भवति। सर्वत्राधीयानो ऽ पविघ्नोभवति।
धर्मार्थकाममोक्षं च विन्दति। इदमथर्वशीर्षशिष्याय न देयम्।
यो यदि मोहाद्दास्यति। स पापीयान् भवति।
सहस्त्रावर्तनात्। यं यं काममधीते।
तं तं तमनेन साधयेत्॥**11**॥

अनेन गणपतिमभिषिंचति। स वाग्मी भवति।
चतुर्थ्यामनश्नन् जपति। स विद्यावान् भवति।
इत्यथर्वणवाक्यम्। ब्रह्माद्यावरणं विद्यात्।
न बिभेति कदाचनेति॥**12**॥

यो दुर्वांकुरैर्यजति। स वैश्रवणोपमो भवति।
यो लाजेर्यजति। स यशोवान्भवति।
स मेधावान्भवति। यो मोदक सहस्त्रेण यजति।
स वांछित फलमवाप्नोति। यः साज्यसमिद्भिर्यजति स सर्वं लभते।
स सर्वं लभते॥**13**॥

अष्टौब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति।
सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमंत्रो भवति।
महाविघ्नात्प्रमुच्यते। महादोषात्प्रमुच्यते। महापापात्प्रमुच्यते।
स सर्वं विद्भवति स सर्व विद्भवति। य: एवं वेद इत्युपनिषत् ॥**14**॥

शांती मंत्र :
ॐ भद्रं कर्णेभि: श्रृणुयाम देवा: भद्रं पश्येमाक्षभिर्यजत्रा: ।
स्थिरै: अंगै: तुष्टुवांस: तनूभि: व्यशे देवहितं यदायु: ॥

ॐ स्वस्ति न इन्द्रो वृद्धश्रवा:, स्वस्ति न: पूषा: विश्ववेदा: ।
स्वस्ति न स्ताक्ष्र्यो: अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ सहनाववतु। सहनौ भुनक्तु। सहवीर्यं करवावहै।
तेजस्विना वधीतमस्तु। मा विद्विषावहै॥
ॐ शान्ति: शान्ति: शान्ति : ॥